**दिनाङ्क :- 01.05.2026**
**प्रात: - 06:55**

## अथ वार्ता:

### वैष्णव-वंदे भारत

जम्मू-तवी-रेलस्थानकात् ह्यः विस्तृतायाः श्रीनगर-जम्मू-वंदेभारत्-एक्स्प्रेस्-सेवायाः हरित-ध्वजप्रदर्शनपूर्वकम् उद्घाटनावसरे जनसमूहं सम्बोधयन् श्रीवैष्णवः अवदत् यत्, जम्मू-कश्मीरस्य पर्वतीयप्रदेशे रेलमार्गेण प्रवेश-प्रदानेन सम्पूर्णस्य देशस्य यात्रिकाः उपकृताः भविष्यन्ति इति। रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् जम्मू-श्रीनगरयोः मध्ये रेलमार्गस्य सञ्चालनेन रेल्मार्गसम्बन्धे महत् परिवर्तनम् अभवच्च।

अस्मिन् अवसरे प्रधानमन्त्रि-कार्यालये केन्द्रीय-राज्यमन्त्रीभूतः डॉ. जितेन्द्रसिङ्हः अवदत् यत्, जम्मू-कश्मीर्-प्रदेशे अस्याः प्रत्यक्ष-रेल्-सेवायाः प्रवर्तनेन यात्रायाः सुगमता महत्त्वपूर्णरूपेण वर्धिष्यते, सम्पूर्णक्षेत्रे व्यापारस्य सुगमता अपि भविष्यतीति निश्चितमस्ति।

### प्रधानमन्त्री-सम्मेलनम्

प्रधानमन्त्रिणा नरेन्द्रमोदिना ह्यः नवदेहल्यां ऐकादशिकं योजना-प्रमुखाणां सम्मेलनम् अभिसंबोधितम्। विदेशमन्त्रालयः एकस्मिन् वक्तव्ये अवदत् यत् विदेशेषु भारतस्य राष्ट्रिय-हितस्य प्रचारार्थं श्रीमोदी बहुमूल्यं मार्गदर्शनं दत्तवान्। विदेशमन्त्रालयेन एप्रिल्-मासस्य अष्टाविंशतितः त्रिंशद्दिनाङ्कपर्यन्तं सम्मेलनस्य आयोजनं कृतमासीत्। विदेशमन्त्री डा. एस्. जयशङ्करः ह्यः उद्घाटनभाषणम् अकरोत्।

### अमित शाह लदखः

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य लेह्- चोग्लामसर्- फोटोङ्ग्- जीवत्साल् च क्षेत्रेषु तथागत-बुद्धभगवतः पवित्रावशेष-प्रदर्शनस्य उद्घाटनं बुद्धपूर्णिमोत्सवस्य च शुभारम्भं करिष्यति। श्रीशाहः लेहस्थे कार्गिलक्षेत्रे केन्द्रीय-बौद्ध-अध्ययन-संस्थायाः प्रतिदिनं दश-सहस्र-लीटर् क्षमतायुक्तस्य दुग्ध-उद्योगस्य शिलान्यासम् अपि करिष्यति। गृहमन्त्री लद्दाखस्य द्विदिवसीययात्रायाम् ह्यः लेह्-नगरं गतवान्।

### कैलाश यात्रा

उत्तराखण्ड्-राज्ये आदि-कैलाश-यात्रा आरभ्यते। पिथौरागढ्-जनपद-प्रशासनं तीर्थयात्रायाः सुकर-निर्वहणार्थं सर्वाः सज्जताः सम्पन्नाः सन्तीति अवोचत्। अन्तःमार्गीय-अनुमतिपत्राणि पूर्वमेव प्रदत्तानि सन्ति, पञ्जीकृताः भक्ताः पूर्वनिर्धारितकार्यक्रमानुसारं यात्रां करिष्यन्ति।

### कोलकाता-पोस्टल-बल्लोटः

कोलकातानगरे ह्यः खुदीराम-अनुशीलन-केन्द्रस्य गणनाकेन्द्रे पत्राचार-मतपत्राणां पृथक्करणसमये नाटकीयदृश्यानि प्रकटितानि। स्ट्रांग्-रूमाख्ये ससुरक्षितप्रकोष्ठे दृश्यमाने दृश्यचित्रे कर्मचारिणः अराजकत्वं जनयन्तः अदृश्यन्, यत्र तृणमूल्-काङ्ग्रेस्-समर्थकाः इ. वि. एम्. इति मध्ये सम्भाव्य-विरूपणं आरोपयन् तत्स्थानं प्रति धावन्तः आगच्छन्। वरिष्ठ-तृणमूल्-नेतारौ शशि-पञ्जकुनाल्-घोषौ तैस्सह सम्मिलितौ आस्ताम्। स्वकीये वक्तव्ये आयोगः अवधानं दत्तवान् यत् पारदर्शकतां निश्चेतुं कठोरसुरक्षाव्यवस्थाः सन्तीति।

**चित्रा पूर्णिमा उत्सवः**

केरल-तमिलनाडु-सीमायां स्थितस्य मङ्गला-देवी-कन्नगी-देवालयस्य चित्रा पूर्णिमा-उत्सवः अद्य भविष्यति। पेरियार्-व्याघ्रसंरक्षणवनान्तस्थः देवालयः प्रातः षड्वादनतः भक्तेभ्यः उद्घाटयिष्यते। मन्दिरस्य अन्तः एतत् मन्दिरं केवलं चैत्रपौर्णिमायाः दिने एव उद्घाट्यते। वनप्रवेशः मध्याह्ने सार्धद्विवादनतः स्थगितः भविष्यति।

**शिवराज सिंह चौहानः ओडिशा**

कृषिकृषककल्याणेन सह ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः अद्य ओडिशायात्रायां भविष्यति। श्रीचौहानः रायगड-नगरे ग्रामीणविकास-मन्त्रालयेन आयोजिते कार्यक्रमे भागं ग्रहीष्यति। सश्चैव तत्र नैकविधानां विकासपरियोजनानां शिलान्यासम् उद्घघाटनञ्च करिष्यति।

**राष्ट्रपतिः-बुद्धपूर्णिमा।**

राष्ट्रपतिः द्रौपदी मुर्मुः बुद्धपूर्णिमायाः अवसरे नागरिकेभ्यः वर्धापनानि यच्छन्ती, स्वकीये सन्देशे उक्तवती यत् अयं पवित्रः दिवसः भगवतः बुद्धस्य पृथिव्यां आगमनस्य, ज्ञानोदयस्य, महापरिनिर्वाणस्य च युगान्तकारीणां घटनानां प्रतीकभूतोऽस्तीति। तस्याः अनुकम्पया, अहिंसायाः, शान्तेः, ज्ञानस्य च अनन्तसन्देशाः सम्पूर्णां मानवजातीं निरन्तरं मार्गदर्शयन्तीति च सा अवोचत्।

**□ई. पी. एल्. क्रिकेट्**

आई. पी. एल्. क्रिकेट्-क्रीडायां गुजरात-टाइटन्स्-दलं गतरात्रौ अहमदाबाद्-नगरस्य नरेन्द्र-मोदी-क्रीडाङ्गणे रायल्-चालेञ्जर्स्-बेङ्गलुरु-दलम् चतुस्तोभैः पराजयत। अद्य सायं सार्धसप्त वादने जयपुरस्य सवाई मानसिंह-क्रीडाङ्गणे राजस्थान-रायल्स्-दलं दिल्ली-क्यापिटल्स्-दलेन सह क्रीडिष्यति।

**।। इति वार्ता:।।**